# Shri Krishnashtakam

# શ્રીકૃષ્ણાષ્ટકમ્

## Document Information

Text title : kRiShNa aShTaka 9

File name : kRRiShNAShTakam9.itx

Category : aShTaka, vishhnu, krishna, brahmAnanda, vishnu

Location : doc_vishhnu

Author : Brahmananda

Transliterated by : Vedha Nathan vnathan.lab at gmail.com

Proofread by : Vedha Nathan vnathan.lab at gmail.com, NA

Latest update : February 10, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણાષ્ટકમ્

ત્રિભુવનાલિસરોજસરોવરં પરમમોદપયઃસુપયોનિધિમ્ ।
વિમલયોગિમનોऽલિકુશેશયં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૧॥

જલજપીઠમુખામરદેશિકં ભવવિરિઞ્ચિસુરેન્દ્રકૃતસ્તવમ્ ।
નિખિલકામિતશીકરતોયદં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૨॥

અદિતિજામ્બુજપુઞ્જદિવાકરં દિતિજકઞ્જતુષારજવોપમમ્ ।
વિગતમોહમજઞ્જનનાન્તકં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૩॥

ત્રિજગદમ્બુરુહોદિતભાસ્કરં સકલસત્ત્વહૃદબ્જકૃતાલયમ્ ।
સ્વજનમોહમહાર્ણવપોતકં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૪॥

શ્રુતિમયોજ્જ્વલકૌસ્તુભમાલિકં રવમુકભૂતમયાસ્ત્રચતુષ્ટયમ્ ।
સભુવનાણ્ડકદમ્બકમેખલં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૫॥

દિનકરાદિવિભાસકભાસકં શ્રુતિમુખાક્ષગણાક્ષમનક્ષકમ્ ।
જ્વલનમારુતશક્રમદાપહં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૬॥

જલધિજાનનકઞ્જમધુવ્રતં રુચિરરૂપવિકૃષ્ટવરાઙ્ગનમ્ ।
યતિવરાદરગીતચરિત્રકં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૭॥

ક્રતુપતિક્રુપતિઞ્જગતામ્પતિં પતિપતિંવિપતિક્રુમલાપતિમ્ ।
ફણિપતિઙ્ગજગોકુલગોપતિં યદુકુલૈકમણિન્તમહમ્ભજે ॥ ૮॥

યદુપતેરિદમષ્ટકમદ્ભુતં વૃજિનશુષ્કવનોગ્રદવાનલમ્ ।
પઠતિયસ્તુસમાહિતચેતસા સલભતેऽખિલયોગફલન્દ્રુતમ્ ॥ ૯॥

॥ ઇતિ શ્રીસ્વામિબ્રહ્માનન્દવિરચિતં શ્રીકૃષ્ણાષ્ટકં સમ્પૂર્ણમ્ ॥

(દ્રુતવિલમ્બિતં વૃત્તં)

સમાનાર્થી શબ્દાઃ

જ - બ્રહ્મા, યતિવર - શુકાદયઃ, કુ - પૃથિવી, વિગતઃ પતિર્યસ્માત્,

વિપતિં - ગરુડાસ્યવા, ફણિપતી - શેષઃ, ગજ - ગજેન્દ્રઃ

Encoded and proofread by Vedha Nathan vnathan.lab at gmail.com, NA

---

*Shri Krishnashtakam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*